संस्कृत-वार्ता:
14.07.2024
सायम् - 06:20

<u>मुख्यवार्ता:</u>

- अद्य मध्य-प्रदेशस्य इन्दौर जनपदे केन्द्रीय-गृह-मन्त्रिणा अमित-शाहेन प्रदेशस्य सर्वेष्वपि पञ्चपञ्चाशत्-जनपदेषु प्रधानमन्त्री-उत्कृष्ट-महाविद्यालयानाम् शुभारम्भो विहित:।
- प्रधानमन्त्री नरेन्द्रमोदी अमेरिकादेशस्य प्राक्तनराष्ट्रपते: ट्रम्पस्योपरि कृताक्रमणं कठोरतया निन्दयन् उक्तवान् यत् राजनीतौ लोकतन्त्रे च हिंसाया: स्थानम् नास्ति।
- ओडिशाया: पुरी-क्षेत्रस्य भगवत: श्रीजगन्नाथ-मन्दिरस्य रत्न-भण्डार इत्यस्य उद्घाटनं षट्चत्वारिंशत् वर्षानन्तरं पुन: जायते।
- टेनिस क्रीडाया: विम्बल्डनाख्ये संघर्षे विश्वस्य द्वितीयक्रमाङ्कस्य क्रीडक: नोवाक्जोकोविच: गतसत्रस्य पुरुष-एकलस्य विजेत्रा कार्लोस-अल्कराज इत्यनेन सह शीर्षपुरस्काराय क्रीडिष्यति।
- यूरोपीय पादकन्दुकक्रीडाया: यूरो-कप इत्यस्या: स्पर्धाया: अन्तिमं चक्रम् अद्य रात्रौ बर्लिनक्षेत्रे भारतीयसमयानुसारं सार्धद्वादशवादने इंग्लैंड-स्पेनयोर्मध्ये क्रीडिष्यते।

<u>एक-पेड-माँ के नाम</u>

गृह-मन्त्रिणा अमितशाहेन अद्य इन्दौर-जनपदे 'एक-पेड-माँ के नाम' इत्यस्य अभियानस्य समारम्भ: कृत:। ध्यातव्यम् अस्ति यत् इन्दौर-जनपद-द्वारा एकस्मिन्नेव दिवसे एकादश-लक्ष-वृक्षाणाम् रोपणं कृत्वा वैश्विक-कीर्तिमत: स्थापना करिष्यते। श्रीअमितशाह: उक्तवान् यत् इन्दौर-जनपद: एकेन स्वच्छ-नगरेण सहैव एकं हरित-नगरम् अपि भवति।

प्रधानमन्त्रिणा श्री-नरेन्द्र-मोदिना कथितं यत् अस्माभि: यूनां कृते हरित-पर्यावरणस्य सौविध्यम् दातव्यम्। एतदर्थम् एव अस्माभि: देशे पञ्चविंशत्यधिक-द्विसहस्राब्द-पर्यन्तं पेट्रोल इत्यस्मिन् विंशति प्रतिशतपरिमितं एथेनाल-संयोजनस्य निर्णयो गृहीत: अस्ति। सर्वकारेण 'जलवायु-परिवर्तन-कोष' इत्यस्य संघटनस्य आरम्भोऽपि कृत:। गृहमन्त्री प्रोक्तवान् यत् देशे 'पर्यावरण-विभागस्य' स्थापना सर्वप्रथमं गुजरात राज्ये प्रधानमन्त्रिणा श्रीमोदिना एव कृता आसीत्। मन्त्री अमितशाह: कथितवान् यत् मध्यप्रदेश: भारतस्य श्वासकोष: वर्तते। अत्र एकविंशति प्रतिशत-परिमितं वनाच्छादित-क्षेत्रम् अस्ति। मध्यप्रदेश: पर्यटन-क्षेत्रेऽपि नूतन-मानकानां स्थापनां करोति। कार्यक्रमोऽयं मुख्यमन्त्रिणा डॉ-मोहन यादव इत्यनेनापि सम्बोधित:। अस्मिन् अवसरे नैका: केन्द्रीय-मन्त्रिण:, मन्त्रिण:, सांसदा:, जनप्रतिनिधय: च सम्मिलिता: आसन्।

पीएम-कॉलेज ऑफ एक्सीलेंस

अवसरेऽस्मिन् केन्द्रीय-गृह-मन्त्रिणा अमित-शाहेन प्रदेशस्य सर्वेष्वपि पञ्चपञ्चाशत्-जनपदेषु प्रधानमन्त्री-उत्कृष्ट-महाविद्यालयानाम् उद्घाटनं कृतम्। अद्य अस्मिन् कार्यक्रमे मुख्यमन्त्री डॉ-मोहन यादव: अपि प्रतिभागितां कृतवान्। विधानसभाध्यक्ष:, उप-मुख्य-मन्त्री, मन्त्रिण: अपि अस्मिन् जनपदस्तरीये कार्यक्रमे उपस्थिता: आसन्।

ट्रम्पस्योपरि आक्रमणम्

अमेरिकादेशस्य प्राक्तनराष्ट्रपते: ट्रम्पस्योपरि कृताक्रमणं कठोरतया निन्दयन् प्रधानमन्त्री मोदी सामाजिक-प्रसारतन्त्र-जाले अलिखत् यत् राजनीतौ लोकतन्त्रे च हिंसाया: स्थानम् नास्ति। प्रधानमन्त्री ट्रम्पम् प्रति शीघ्रसुस्वास्थ्यस्य शुभकामनापि प्रकटितवान्। अग्रे प्रधानमन्त्रिणा उक्तं यत् भारतीयजनानां प्रार्थना: शुभाशंसाश्च व्रणितेभ्य: जनेभ्य: सन्ति, येन सर्वेऽपि शीघ्रतया सुस्वास्थ्यं लभेयुरिति। श्रीट्रम्प: अमेरिकाया: पेनिसिल्वानिया क्षेत्रस्य बट्लर् इति स्थाने भुशुण्डिकाप्रहारेण आहतोऽस्ति। गतरात्रौ जातायां दुर्घटनायां-एक: सामान्यनागरिक: एकश्च भुशुण्डिधर्ता निहत:। ट्रम्पेन आरक्षिवर्गस्य त्वरितसहायतायै तेभ्य: साधुवादा: सन्ति प्रेषिता:। अमेरिकाया: राष्ट्रपतिना जो-बाईडेन इत्यनेनापि ट्रम्पस्य रक्षणाय आभारभावा: सन्ति प्रकटिता:।

जगन्नाथ: रत्न भण्डार

ओडिशाया: पुरी-क्षेत्रस्य भगवत: श्रीजगन्नाथ-मन्दिरस्य रत्न-भण्डार इत्यस्य द्वाराणाम् उद्घाटन-प्रक्रिया अद्य अपराह्ले अष्टविंशत्यधिक-एक वादने आरब्धा। एकेन विशेष-दलेन रत्न-भण्डारस्य आन्तरिक-द्वाराणाम् उद्घाटनकार्यं करिष्यिते। इत: प्राक् पञ्चाशीत्यधिक-ऊनविंशतितमे ख्रीष्टाब्दे (1985) उद्घाटनं कृतम् आसीत्। अखिलो हि देश: रत्नभण्डारान्तर्गतानि रत्नानि, बहुमूल्याभूषणानि प्रति औत्सुक्येन दर्शनार्थं, ज्ञानार्थञ्च प्रतीक्षारत: वर्तते।

हमारा-संविधान

न्यायं यावत् पूर्णत: प्रापणाय नवोन्मेषी समाधानप्रारूपाय च DISHA इत्याख्य: कार्यक्रम: अस्य मासस्य षोडशदिनाङ्के प्रयागराजनगरे भविष्यति। कार्यक्रमोऽयं भारतीय-संविधानस्य स्वीकरणाय, भारतीयगणतन्त्रस्य पञ्चसप्ततिवर्षपूर्तावधौ उत्सवत्वेन परिपाल्यते। अभियानस्यास्य उद्देश्यं वर्तते यत् संविधानाभिज्ञानस्य वरीवर्धनेन सह न्याय्याधिकारेषु अभिरूच्यभिवर्धनञ्चेति। आयोजनकाले नागरिकाणां सहयोगाभिवर्धनाय 'हमारा सम्विधान-हमारा सम्मान' इत्याख्यं वेबफलकमपि अस्ति समुद्घाटितम्। पटलोऽयं

ज्ञानागाररूपेण कार्यं करिष्यति, यो हि नागरिकेभ्य: संविधानविषये, न्याय्याधिकारविषये च जागरूकताभिवर्धनेन सह सारल्येन जनान्तं यावत् प्रापणमपि सुकरं करिष्यति।

## बिड़ला-भारतीय प्रवासी

लोकसभाध्यक्ष: ओमबिडला: रूसदेशस्य मास्को नगरे भारतीय प्रवासिन: सम्बोधयन् सबलं प्रोक्तवान् यत् विदेशस्था: भारतीया: भारतस्य विकासाय, तस्याधुनिकीकरणाय च अभिन्ना: भागधेया: सन्ति। तेन राष्ट्रनिर्माणे निरतान् प्रवासिन: प्रति कार्तज्ञभावान् प्रकटयता प्रोक्तं यत् एते प्रवासिन: रूसदेशे भारतस्य राजदूतरूपेण स्थित्वा स्वकार्याचरणै:, योगदानादिभिश्च रूसे भारतस्य छविं सम्मार्जयन्त: सन्तीति।

## नेपाल-दुर्घटना

शुक्रवासरे भूस्खलनत्वात् द्वयो: बसयानयो: त्रिशूलीति नद्यां पतनेन प्रवाहितानां पञ्चयात्रिणां शवा: लब्धा:। ह्य: नारायण्यां नद्यां लब्धानां त्रयाणां शवानामपि स्पष्टता सञ्जातास्ति। वार्तेयं नेपालदेशस्य आसीत्

## विम्बलडन

टेनिस-क्रीडाया: विम्बल्डनाख्ये संघर्षे विश्वस्य द्वितीयक्रमाङ्कस्य क्रीडक: नोवाक्जोकोविच: अद्य संध्यायां कश्चित्कालानन्तरं लैंडन् इति क्षेत्रे गतसत्रस्य पुरुष-एकलस्य विजेत्रा कार्लोस-अल्कराज इत्यनेन सह क्रीडिष्यति। विंबल्डन् इत्यस्य अन्तिमे संघर्षे अल्कराजस्य एषा द्वितीया उपस्थिति: अस्ति। तत्रैव सर्बियादेशस्य जोकोविच: सप्तधा विजयं लब्धवानस्ति। सम्प्रति जोकोविच: रोजर्फेड्रर् इत्यस्य अष्टविजयानां साम्यं कर्तुमिच्छति। मिश्रित-युगलानाम् अन्तिमे चक्रे जान्-जिलिंस्की अथ हसिह सु-वेई इत्यनयो: सप्तक्रमाङ्क: युगल: अद्यैव सायं सैंटियागो-गोंजालेज् अथ गिउ-लियाना-ओलमोस् इत्यमू विरुध्य क्रीडिष्यति।

## पादकन्दुकम्

यूरोपीय पादकन्दुकक्रीडाया: यूरो-कप इत्यस्या: स्पर्धाया: अन्तिमं चक्रम् अद्य रात्रौ बर्लिनक्षेत्रे भारतीयसमयानुसारं सार्धद्वादशवादने इंग्लैंड स्पेनयोर्मध्ये क्रीडिष्यते। यत्र स्पेनदेश: वारचतुष्टयं जेतुमिच्छति तत्रैव इंग्लैंडदेश: प्रथमजयाय संघर्षं करोति। अन्यैकस्मिन् कोपा-अमेरिकाख्ये खेले अर्जेन्टिना-कोलंबिया च देशौ भारतीयसमयानुसारं श्व: प्रात: सार्धपञ्चवादने संघर्षं करिष्यत:।

।। इति वार्ता: ।।